आदिपुस्तकं।

मुसालिखितं प्रथमपुस्तकं।

१ प्रथमोऽध्यायः।

१ पृथिव्या आकाशस्य च सृष्टिः ३ दीप्तेः सृष्टिः ६ शून्यतायाः सृष्टिः ९ शुष्कभूमेः सृष्टिः ११ वृक्षादीनां सृष्टिः १४ चन्द्रसूर्य्यादीनां सृष्टिः २० मीनपक्षिणां सृष्टिः २४ ग्राम्यवन्य-पश्वादीनां सृष्टिः २६ ईश्वरस्य सादृश्येन मनुष्यस्य सृष्टिः २९ मानुषादीनां भक्ष्यञ्च।

१ आदित ईश्वर आकाशं पृथिवीञ्च ससर्ज। पृथिवी निर्जना शून्या
२ चासीत्, अन्धकारञ्च गम्भीरजलस्योपरि तस्थौ, तदानीम् ईश्वरस्यात्मा
तोयानि व्याप्यासीत्।
३ अनन्तरं, दीप्तिर्भवतु, इतीश्वरेणाज्ञापिते दीप्तिर्बभूव। तदानीम्
४ ईश्वरो दीप्तिमुत्तमां विलोक्य तमिस्रात् तां पृथक् कृत्वा दीप्ते र्नाम
५ दिवसइति, तमिस्रस्य नाम रात्रिरिति कृतवान्। ततः सन्ध्यायां प्रातः-
काले च जाते प्रथमो दिवसो बभूव।
६ ततः परं तोयानां मध्ये शून्यत्वमुद्भूय तोयानि भागद्वयेन पृथक् करोतु।
७ ईश्वर इत्यादिश्य शून्यत्वं ससर्ज शून्योर्द्धस्थिततोयेभ्यः शून्याधःस्थितनो-
८ यानि पृथक् चकार च, ततस्तादृशं बभूव। तदेश्वरस्तस्य शून्यस्य नाम
गगणं चकार। सन्ध्यायां प्रातःकाले च जाते द्वितीयो दिवसो बभूव।
९ पश्चात् ईश्वर इत्याज्ञापयामास, गगणाधःस्थितानि सर्व्वाम्भांसि एक-
१० स्मिन् मिलन्तु स्थलञ्च प्रकाशतां; ततस्तथैव बभूव। तदेश्वरः स्थलनाम
पृथ्वीति तोयराशेर्नाम समुद्रइति कृतवान्, तच्चोत्तमं ददर्श।
११ अपरम् ईश्वर आदिदेश, मेदिन्यां तृणानि सवीजौषधयो नानाजा-
तीयाः सवीजफलदायिनो महीरुहाश्च समुत्पद्येरन्; ततस्तथैवाभवत्;
१२ अर्थात् पृथिव्यां तृणानि सवीजनानाजातीयौषधयः सवीजफलदायिनो

नानाविधा वृक्षाश्च जातानि, तदानीमीश्वरस्तानि सर्व्वाण्युत्तमानि दृष्ट-
वान्। तथा सन्ध्यायां प्रातःकाले च जाते तृतीयो दिवसो बभूव। १३
अपरम् ईश्वर आज्ञापयत्, निशातो दिवसं पृथक् कर्त्तुं दिवस- १४
वत्सरर्त्तुचिह्ननिमित्तं नभोमण्डले ज्योतिर्गणा उत्पद्यतां. तथा वसुन्ध- १५
रायामालोकं कर्त्तुं दीपइव गगणमण्डले तिष्ठतु; ततस्तादृगभवत्। इत्थम् १६
ईश्वरो दिवसं शासितुम् महाज्योतिरेकं, क्षणदाञ्च शासितुं ततः क्षुद्र-
ज्योतिरेकं, इमे वृहती ज्योतिषी उडुनिवहञ्च ससर्ज। ततो धरित्रीं १७
दीपयितुं, दिवारात्री शासितुं, तमिस्राद् विद्युतिं पृथक् कर्त्तुञ्चेश्वरस्तानि
ज्योतींषि गगणमण्डले स्थापयामास; तानि सर्व्वाणि चेश्वर उत्तमानि १८
वीक्षाञ्चक्रे। तथा सन्ध्याप्रातःकालयोः जातयोः सतोश्चतुर्थो दिवसो १९
बभूव।

ततः परं सलिलानां मध्ये विहारार्थं नानाविधा जलचराः प्राणिनो, २०
मेदिन्या ऊर्द्ध्वे नभोमण्डले उड्डयितुं शक्ता विहगाश्च बाहुल्यम् उत्पद्य-
न्ताम्, इतीश्वर आदिश्य वृहन्मीनादीन् नानाप्रकारान् कीलालचरान् २१
प्राणिनो नानाविधखगांश्च सृष्टवान्। अनन्तरम् ईश्वर एतान् सर्व्वान् २२
उत्तमान् वीक्ष्य एतामाशिषं जगाद, यूयं प्रजावन्तो बहुवंशाश्च भूत्वा
सरित्पतीनां सलिलानि परिपूरयत, वसुधाया उपरि विहङ्गमाश्च बहु-
लीभवन्तु। तथा सन्ध्यायां प्रभाते च जाते पञ्चमो दिवसोऽभवत्। २३
ततः परम् ईश्वर आदिदेश, धरायां ग्राम्या वन्याश्च पशव उरोगा- २४
मिनो जन्तुप्रभृतयो नानाविधा जन्तवो जायन्ताम्; ततस्तथैव बभूव।
इत्थम् ईश्वरो नानाविधान् ग्राम्यवन्यपशून् भूमे र्नानाजातीयान् उरङ्गम- २५
जन्तूंश्च सृष्ट्वा सर्व्वानेवोत्तमान् व्यालुलके।
अनन्तरम् ईश्वरो व्याचचक्षे, वयं स्वप्रतिमूर्त्त्या सादृश्येन च आदमं २६
(अर्थात् मनुष्याः) सृजामः, ते जलचरमीनान् खेचरविहङ्गान् ग्राम्यवन्य-
पशून् सर्व्वपृथिवीं भूमिस्थितोरङ्गमान् प्राणिनश्च शासतु। ईश्वरेण २७
स्वप्रतिमूर्त्त्या मनुष्यः ससृजे; ईश्वरस्य प्रतिमूर्त्त्यैव स तेन सृष्टः; पुरुष-
स्त्रीलाभ्यां तौ सृष्टौ। तदनन्तरम् ईश्वरस्ताभ्याम् इत्याशिषं ददौ, युवां २८
प्रजावन्तौ बहुवंशौ च भवतं, पृथिवीं परिपूर्य्य वशीभूतां कुरुतं,
किञ्च सलिलचरमीनान् खेचरखगान् भूमिस्थोरङ्गमजन्तूंश्च शिष्टं।
ईश्वरोऽपरमपि कथयामास, पश्यतं, निखिलपृथिवीस्थाः सर्व्वसवीजौ- २९
षधीः सर्व्वान् सवीजफलदायिनो महीरुहांश्च युवाभ्यां भोक्तुम् अद-

३० दाम्। तथा वन्यपशुखेचरखगेभ्यो भूमिस्थितसजीवोरङ्गमजन्तुभ्यश्च
३१ भोक्तुं सर्व्वहरितौषधीरहमदाम्; ततस्तथैव बभूव। अनन्तरम् ईश्वरः
स्वसृष्टसकलवस्तूनि निरीक्ष्य सर्व्वाण्यत्युत्तमानि ददर्श। तथा सन्ध्यायां
प्रातःकाले च जाते षष्ठं दिनं बभूव।

२ द्वितीयोऽध्यायः।

१ विश्रामवारस्य निरूपणं ४ सृष्टेर्वृत्तान्तः ७ एदनुद्याननिर्म्माणं १५ तस्य मध्ये मनुष्यस्थापनं १८ स्त्रियाः सृष्टिवृत्तान्तश्च।

१ इत्थम् आकाशस्य पृथिव्यास्तदुभयस्थानां सर्व्ववस्तूनाञ्च सृष्टिः सम्पूर्णा
२ बभूव। यस्मात् सप्तमे दिने ईश्वरः स्वकृतकर्म्माणि समाप्य तस्मिन् सप्तमे
३ दिने स्वकृतकार्य्येभ्यो विशश्राम। तदा ईश्वरेण सप्तमं दिनम् आशिष्य
पवित्रीकृतं, यस्मात् तस्मिन् दिने ईश्वरेण स्वकृतनिखिलसृष्टिकार्य्यात्
विश्रामोऽकारि।

४ सृष्टिकाले गगणधरित्र्योरियं विवृतिः। यस्मिन् काले प्रभुः परमेश्वरः
पृथिव्याकाशौ ससर्ज, तदानीं पृथिव्यां किमपि क्षेत्रियं तृणं नासीत्
५ क्षेत्रिया काप्योषधिश्च नासीत्; यतः प्रभुः परमेश्वरः पृथिव्यां न ववर्षा-
६ मास भूमौ कृषिकर्म्म कर्त्तुं मनुष्यो नासीत्। किन्तु पृथिव्याः शिशिरः
समुत्थाय सर्व्वां भूमिम् असिञ्चत्।

७ अपरञ्च प्रभुणा परमेश्वरेण मृदा मनुष्यं निर्माय तस्य नासारन्ध्रे
८ प्राणवायौ प्रवेशिते स सात्मप्राणी बभूव। अनन्तरं प्रभुः परमेश्वरः
पूर्व्वदिक्स्थिते एदन्नामकदेशे उद्यानमेकं कृत्वा तत्र स्वसृष्टं तं मानवं
९ स्थापयामास। तत्र प्रभुः परमेश्वरः भूमौ सर्व्वजातीयान् सुदृश्यान्
सुखाद्यफलान् पादपान् तस्योद्यानस्य मध्यस्थाने अमृतं पादपं सदस-
१० ज्ज्ञानदातारं पादपञ्च जनयाञ्चकार। उद्यानं सलिलेन सेक्तुम् एका
११ स्रवन्ती एदनुद्यानात् निर्याय विभिद्य चतुर्मुखी भूत्वा प्रावाह। तस्याः
पीशोनाख्या प्रथमा तटिनी सुवर्णोत्पादिनी हवीला देशनिवहान्
१२ वेष्टित्वा प्रावाह। तस्य देशस्य जातरूपम् अतीवोत्तमं, तस्मिन् स्थाने
१३ रत्नानि वैदूर्य्यमणयश्च जायन्ते। तथा तस्या गीहोन्नामिका द्वितीया
१४ धुनी समस्तकूशदेशं वेष्टमाना प्रावाह। तथा तस्या हिद्देकल्नामा
तृतीया धुनी अस्सूरियादेशस्य पूर्व्वदिशा प्रावाह। तथा तस्याः चतुर्थ-
धुन्या नाम फरात्।

ततः परं प्रभुः परमेश्वर आदमं नीत्वा एदनस्थितस्योद्यानस्य कर्म्म १५
कर्त्तुं तदवितुञ्च नियोजयामास। किञ्च प्रभुः परमेश्वरस्तमित्यादिदेश, १६
एतस्योद्यानस्य सकलपादपानां फलानि त्वया स्वच्छन्दं भोक्तव्यानि;
किन्तु सदसज्ज्ञानदातुः पादपस्य फलं मा भुज्यतां, यतो यस्मिन् दिने १७
तत् खादिष्यसि तस्मिन्नेव दिने निश्चितं मरिष्यसि।

अनन्तरं प्रभुः परमेश्वरो जगाद, मनुष्यो यद् एकाकी तिष्ठेत् तन् न १८
भद्रं, तस्य साक्षादिव एकः सहकारी मया निर्म्मास्यते। प्रभुणा परमे- १९
श्वरेण मृदा निर्म्मितानां वन्यपशुखेचरखगानां कानि नामान्यादम् करि-
ष्यतीति वेदितुं यदेश्वरः सर्व्वप्राणिनस्तस्य समीपमानयामास, तदानीं
आदम् यस्य यन्नाम चकार, तस्य तदेव नामाभवत्। तदा आदम् सर्व्वेषां २०
पशूनां खेचरखगानां वन्यपशूनाञ्च नामानि कृतवान्, किन्तु तेषां मध्यत
आदमा साक्षादिव एकः सहकारी न प्राप्तः। अनन्तरं प्रभुः परमेश्वर २१
आदमम् अतिनिद्राप्य तस्यां निद्रायां तस्यैकं पञ्जरं गृहीत्वा क्रव्येण तत्
स्थानं पूरयामास। किञ्च प्रभुणा परमेश्वरेण यः पञ्जर आदमो नीत- २२
स्तेन स एकां स्त्रियं निर्म्माय ताम् आदमः सन्निधिम् आनिनाय। तदा- २३
नीम् आदम् आचचक्षे, एषैव मदीयास्थ्नाम् अस्थि मदीयमांसस्य मांसं;
इयं नरादजनिष्ट, तस्माद् अस्या नाम नारीति कारिष्यते। एतदर्थं २४
मानवः स्वमातापितरौ परित्यज्य स्वभार्य्यायाम् आसंक्ष्यति, तौ द्वौ
जनावेकाङ्गौ भविष्यतः। तदानीम् आदमस्तद्भार्य्यायाश्च नग्नत्वे स्थिते २५
तयोरपि लज्जाबोधो नासीत्।

---

३ तृतीयोऽध्यायः।

१ सर्पस्य कथनं ८ तेन मानुषाणां पतनं १४ सर्पस्य शप्तत्वं १६ नारीपुरुषयोः शप्तत्वं २१ ताभ्यां वस्त्रं दत्त्वा उद्यानतो दूरीकरणञ्च।

प्रभुणा परमेश्वरेण सृष्टानां भूचरजन्तूनां मध्ये सर्पोऽतीव खल १
आसीत्। स तां नारीमवदत् अये अस्योद्यानस्य कस्यचिदपि पादपस्य २
फलानि भोक्तुं परमेश्वरो युवां न्यषेधत्, किमिदं सत्यं? ततो नारी सर्पं
प्रोवाच, आवाम् एतस्योद्यानस्य सर्व्वेषां विटपिनां फलानि भोक्तुं शक्नुवः ३
केवलम् उद्यानमध्यस्थितस्य पादपस्य फलं प्रतीश्वरेण कथितं, युवाम्
एतत् फलं मा भुञ्जाथाम् मा स्पृशतञ्च, तत् कृत्वा मरिष्यथः। तदा भुजगो ४
नारीं बभाषे, युवां निश्चितं न मरिष्यथः, किन्तु यदा तत् खादिष्यथः, ५

तदा युवयोर्लोचनप्रकाशो भविष्यति; तत ईश्वर इव भद्राभद्रज्ञानं
६ लप्स्येथे, इतीश्वरो जानाति। तदा नारी तं महीरुहं सुखाद्यफलं लोचन-
रञ्जकं ज्ञानलाभाय वाञ्छनीयञ्च विज्ञाय तस्य फलानि शातयित्वा
७ बुभुजे, स्वस्वामिने च ददौ सोपि भुक्तवान्। तेन तयोरुभयो र्नयन-
प्रकाशो बभूव, ततस्तौ स्वकीयनग्नतां विज्ञाय वटपत्राणि स्यूत्वा कटौ
बबन्धतुः।

८ ततो दिवावसाने मध्ययुद्यानं गमनागमनकारिणः प्रभोः परमेश्वरस्य
रवं श्रुत्वा आदम् तस्य जाया च प्रभोः परमेश्वरस्य सम्मुखात् उद्यान-
९ स्थानां शाखिनां मध्येऽन्तर्दधाते। तदा प्रभुः परमेश्वर आदमम् आहूय
१० बभाषे, त्वं कुत्र? ततः स उवाच, उद्याने भवतः शब्दं श्रुत्वा नग्नता-
११ कारणात् भीत्वा स्वमगोपयम्। स जगाद, त्वं नग्नोसीति कस्त्वामबोधयत्?
यस्य वृक्षस्य फलं भोक्तुं त्वामहं न्यसेधं तस्य वृक्षस्य फलं किं त्वया भुक्तं?
१२ तत् आदमा गदितं, त्वं यां योषितं मम सङ्गिनीमकरोः, सा मह्यं तस्य
१३ पादपस्य फलम् अददात् तन्मया भुक्तं। प्रभुः परमेश्वरो नारीं जगाद,
त्वया किमिदम् अकारि? नारी बभाषे, सर्पस्य प्रवञ्चनयाहं अखादम्।

१४ पश्चात् प्रभुः परमेश्वर उरगं जगाद, त्वमिदं कर्माकरोः, तस्मात्
ग्राम्यवन्यपशुगणात् अधिकशापग्रस्तो भूत्वा वक्षसा गमिष्यसि, यावज्जीवं
१५ धूलीः खादिष्यसि च। किञ्च त्वया योषिता च त्वदीयवंशेन तस्या वंशेन
च परस्परं वैरितां जनयिष्यामि, तेन स त्वदीयशिर आहनिष्यति,
त्वञ्च तस्य पादमूले आहनिष्यसि।

१६ अनन्तरं स नार्य्यै कथयामास, त्वदीयप्रसववेदनाम् अहम् अतीव
वर्द्धयिष्यामि, ततस्त्वम् अतिशयकष्टेन सन्तानान् प्रसविष्यसि, तथा
स्वामिनो निघ्नीभूय स्थास्यसि स च त्वां शास्यति।

१७ ततः परं स आदमे कथयाञ्चकार, यस्य पादपस्य फलं भोक्तुं त्वामहं
न्यसेधं, त्वं योषितः कथां निशम्य तस्य पादपस्य फलं अभुंक्थाः, तत्-
कारणात् भूमिरभिशप्ता जाता; त्वया यावज्जीवं क्लेशं प्राप्य तस्याः
१८ शस्यादि भक्षिष्यते। तस्यां शृगालकण्टकानि नानाकण्टकिद्रुमा उत्प-
१९ त्स्यन्ते, त्वञ्च क्षेत्रस्यौषधीः खादिष्यसि। अपरञ्च यस्या मृत्तिकाया अजा-
यथा यावत् तस्यां लीनो न भविष्यसि तावत् घर्म्माक्तमुखेन भक्ष्यं भोक्ष्यसे;
२० यतस्त्वं मृत्तिका, पुनरपि मृत्तिकायां लीनो भविष्यसि। अनन्तरं आदम्
तस्या योषितो नामधेयं हवा (अर्थात् जीवनीति) चक्रे, यतः सा सर्व्वा

सजीवलोकानां माता। ततः प्रभुः परमेश्वरः चर्म्मणो वसनं निर्म्माय २१
आदमं तस्य भार्य्याञ्च परिधापयामास।
ततः परं प्रभुः परमेश्वर उवाच, पश्य, मानवो भद्रमभद्रञ्च विज्ञाय २२
अस्माकमेकइवाभवत्; इदानीं स हस्तं प्रसार्य्य अमृतवृक्षस्य फलं
पातयित्वा तद् भुक्त्वा अमरो न भवेत्। तदर्थं प्रभुः परमेश्वरस्तम् एदन् २३
उद्यानात् अपसार्य्य तदुत्पादिन्यां मृत्तिकायां कृषिं कर्त्तुं तं न्ययोजयत्।
इत्थं स तं मानुषं दूरीकृत्य अमृततरोः पन्थानं रक्षितुं एदन्उद्यानस्य २४
पूर्व्वस्यां दिशि घूर्णायमानतेजोमयखड्गधरान् किरूवः स्थापयामास।

THE

HOLY BIBLE

IN THE

SANSCRIT LANGUAGE.

VOL. I.

TRANSLATED OUT OF THE ORIGINAL TONGUES

BY THE

CALCUTTA BAPTIST MISSIONARIES,

WITH NATIVE ASSISTANTS.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

1848.